International Journal of Sanskrit Research 2022; 8(2): 273-275

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(2): 273-275
© 2022 IJSR
www.anantaajournal.com
Received: 16-01-2022
Accepted: 20-02-2022

**Sujatha Balasubramanian**
Independent Researcher,
Bangalore, Karnataka, India

**Corresponding Author:**
**Sujatha Balasubramanian**
Independent Researcher,
Bangalore, Karnataka, India

# महाभारते वनपर्वणि युधिष्ठिरसर्पसंवादः- एका समीक्षा

**Sujatha Balasubramanian**

## प्रस्तावना

महर्षिवेदव्यासेन प्रणीतं महाकाव्यं महाभारतं को न जानाति? न केवलं ऐतिहासिकग्रन्थोऽयम् अपितु धर्मग्रन्थो मोक्षशास्त्रञ्च। वेदेषु उपनिषत्सु निहितं पारमार्थिकशाश्वतज्ञानं महर्षिणा वेदव्यासेन अतिसरलतया मनोरञ्जकशैल्या काव्येऽस्मिन् सुबोधितम्। यद्यपि अस्य काव्यस्य मुख्या कथा आर्यावर्तीयराजवंशानां परस्परराजनैतिकसङ्घर्षस्य वर्णनम् अस्ति, तत्रैव मध्ये मध्ये आत्मतत्त्वविवेचनं, धर्मस्य परिभाषास्वरूपलक्षणणानि, मोक्षादिपुरुषार्थप्राप्तिः इत्यादयः आध्यात्मिकविषयाः अपि योजिताः भगवता व्यासेन। यतो हि कथाख्ययायिकादिभिः सामान्यजनाः निगूढं ज्ञानमपि अनायासेन गृह्णन्ति।
वनपर्वणि यक्षधर्मराजयोः संवादः सुप्रसिद्ध एव। तथैव वनपर्वणः १८१ तमे अध्यायेऽपि कश्चन चर्चायोग्य सम्वादः वर्तते यस्मिन् कानिचन मौलिकतत्त्वानि परिलक्ष्यन्ते। अयं संवादो भवति युधिष्ठिरनहुषयोर्मध्ये।

## विषयालोचना

द्यूतक्रीडायां पराजिताः राज्यात् परिभ्रष्टाः पाण्डवाः द्वैतवने विचरन्तः आसन्। । एकदा गहनारण्ये अटन् सिंहनादं कुर्वन् भीमसेनः एकां कन्दरां प्रविष्टवान् यत्र कश्चन विशालकायः घोरः महासर्पः निद्रायमाणः आसीत्। निद्राभङ्गपीडितः क्षुधार्दितः सः भुजङ्गः भीमसेनं सहसा अभ्येत्य बलेन जग्राह। तस्य आकृतिः भयङ्करासीत्। तस्य स्पर्शमात्रेण भीमः निर्बलोऽभूत्। दशसहस्रगजबलयुक्तोऽपि भीमसेनः नागवशात् आत्मानं मोक्तुम् असमर्थो आसीत्।
प्राप्तवान् यत्र नागग्रस्तो भीमः आसीत्। सर्पभोगेनवेष्टितं सहोदरं दृष्ट्वा धर्मराजः आशचर्यचकितोऽभूत्। 'कोऽयं पन्नगश्रेष्ठः येन मम अतिविक्रमो भ्राता अनायासेन ग्रहीतः, निश्चयेन देवो वा दैत्यो वा भवेत् इति चिन्तयन् युधिष्ठिरः विनम्रतया भ्रातरं

भीममं मोचयितुं तं महोरगमयाचत। युधिष्ठिरस्य कथनं श्रुत्वा सः पन्नगः स्वस्य वृत्तान्तं श्रावयितुमारब्धः। अहो विचित्रा स्थितिः। सः नागराजोऽपि चन्द्रवंशीय आसीत् अतः भीमयुधिष्ठिरयोः पूर्वजः।

"सोमादुत्तपन्नस्य महाराजस्य आयोः पुत्रो नहुषो नाम राजासम्। बहुभिर्यज्ञैः तपसा स्वाध्यायेन दमेन च त्रैलोक्याधिपत्यं मया प्राप्तम्। किन्तु तदैश्वर्यं समासाद्य अतिगर्वितोऽभवम्। मदान्धः काममोहितोऽहं ब्राह्मणश्रेष्ठान् शिबिकाम् ऊढ्वा माम् इन्द्रभवनं नेतुं आदिष्टवान्। शचीदेव्या सह सङ्गमार्थम् अधीरोऽहं माम् स्कन्धे वहतः शनैः शनैः गच्छतः तान् विप्रान् सर्प सर्प इति अपशब्दैः प्रताडितवान्। मम असभ्यव्यवहारेण क्रुद्धः सन् अगस्त्यमुनिः मां एवं शशाप 'यतो हि सर्पेति दुर्वचसा त्वया मर्यादोल्लङ्घनमभूत् अतः सर्पशरीरे भूलोकवासः कर्तव्यः'। तदैव अत्राहं नागरूपे वसन्नस्मि। आगच्छतं प्राणिनं भुङ्क्त्वा कालं यापयामि। तवानुजः भीमसेनः दिवसस्य षष्ठे भागे मया ग्रहीतः अतः मम आहारः। नाहं तं त्यक्षामि।

युधिष्ठिरः मनस्सन्तुलनम् अत्यक्त्वा तं नागरूपधारिणं पूर्वजं पुनः नमस्कृत्य शापविमोचनस्योपायम् अपृच्छत्। युधिष्ठिरस्य धैर्येण शीलस्वभावेन च तृप्तः नहुषोऽवदत् "महर्षिणा अगस्त्येनोक्तम् यत् यदा मम वंशजः पाण्डुपुत्रः युधिष्ठिरः मम प्रश्ननानां यथोचितम् उत्तरं दास्यति तदा अहं शापविमुक्तो भविष्यामि।

"अहमेव स पाण्डुपुत्रो युधिष्ठिरः। पृच्छतु भवान्। यावच्छक्यम् उत्तरितुं यतेऽहम्" इति युधिष्ठिरः प्रत्यवदत्।

सर्प उवाच

ब्राह्मणः को भवेद् राजन् वेद्यं किं च युधिष्ठिर।
ब्रवीह्यतिमतिं त्वां हि वाक्यैरनुमिमीमहे ।। (३/१८०/२०)

को भवेत् ब्राह्मणः किं ज्ञानं अर्जितव्यम्? इत्यासीत् नहुषस्य प्रथमः प्रश्नः।

युधिष्ठिर उवाच

सत्यं दानं क्षमा शीलमानृशंस्यं तपो घृणा
दृश्यन्ते यत्र नागेन्द्र स ब्राह्मण इति स्मृतः।। (३/१८०/२१)

यस्मिन् पुरुषे सत्यं, दानं, क्षमा, सुशीलता, करूणा, तपस्या तथा दया इत्येतेगुणाः वर्तन्ते सः एव ब्राह्मण इत्युच्यते।

शूद्रे तु यद् भवेल्लक्ष्म द्विजे तच्च न विद्यते।
न वै शूद्रो भवेच्छूद्रो ब्राह्मणः न च ब्राह्मणः ।। (३/१८०/२५)

एते गुणाः यदि शूद्रे विद्यन्ते तर्हिं तं शूद्रमिति कथयितुं न शक्यते। एवमेव यदि सत्यादि गुणाः कर्स्मिश्चित् द्विजे न परिलक्ष्यन्ते सः ब्राह्मण इति कथयितुम् नार्हति।

यत्रेदानीं मसासर्प संस्कृतं वृत्तमिष्यते।
तं ब्राह्मणं पूर्वमुक्तवान् भुजगोत्तम।। (३/१८०/३७)

लोकेऽस्मिन् यः संस्कारी सदाचारी शीलस्वभावी वर्तते सः एव ब्राह्मण इति मे मतिः।

सन्तुष्टः नहुषोऽपि प्रत्योवाच

सत्यं दामस्तपो दानं हिंसा धर्मनित्यता।
साधकानि सदा पुंसाम् न जातिर्न कुलं नृप ।।(३/१८०/४२)

सत्य, इन्द्रीयसंयमं, तपस्या, दानं अहिंसा एभिरेव पुरुषः सिद्धिं प्राप्नोति, न तु जातिकुलादिभिः।

स्ववंशजस्य युधिष्ठिरस्य विवेकेन शिष्टव्यवहारेण मनोबलेन च तृप्तः सः सर्परूपी नहुष आशीर्वचनैः सह भीमसेनं मुमोच।

किन्तु संवादोऽत्र न समाप्तः। सदाज्ञानपिपासुः धर्मराजोऽचिन्तयत् -"एष मम पूर्वजः। यद्यपि संप्रति भुजङ्गवेशधारी अस्ति तथापि पुरा नैके यज्ञादयः कृताः। अत एतस्मात् ज्ञातुं बहवो विषयाः भवेयुः। इति विचिन्त्य युधिष्ठिरः पृच्छको भूत्वा नानाविधान् प्रश्नानपृच्छत्।

युधिष्ठिर उवाच

कथं स्वर्गे गतिः सर्प कर्मणां च फलं ध्रुवम्।
अशरीरस्य दृश्यते प्रब्रूहि विषयांश्च मे।

हे सर्प देहान्ते आत्मनः का गतिः? स्वर्गप्राप्तिः कथं भवति?

सर्प उवाच

तिस्रो वै गतयो राजन् परिदृष्टाः स्वकर्मभिः।
मानुषं स्वर्गवासश्च तिर्यग्योनिषु तत् त्रिधा ।।

स्वकर्मफलानुसारेण जीवानां तिस्रो गतयो दृश्यन्ते- स्वर्गलोकप्राप्तिः, मानुषजन्म, पशुपक्षीत्यादिषु तिर्यग्योनिषु जन्म।
यदि कश्चन मानुषं जन्म लब्ध्वापि कामक्रोधहिंसादिषु असक्तः सन् मानवतातः भ्रष्टो भवति तर्हि पुनः मानवीयजन्मस्य अधिकारं त्यक्त्वा तिर्यग्योनौ जायते। तत्रैव दानादि शुभकर्मणा मनुष्यस्य स्वर्गप्राप्तिः भवति।
एवं नहुषो बहुभ्यः वर्षेभ्यः सङ्कलितं ज्ञानं तस्मै सहर्षमयच्छत्। तदनन्तरं शापविमुक्तः सन् दिव्यरूपं धृत्वा दिवं जगाम।

## उपसंहारः

प्रसङ्गादस्मात् किं वेद्यम्?मानवः सामाजिकप्राणी। समाजे तस्य काचित् प्रतिष्ठा काचित् मर्यादा वर्तते। किन्तु इयं प्रतिष्ठा मर्यादा वा क्षणभङ्गुरा । सर्वासु स्थितिषु स्वस्य आचरणं कथं भवेदिति सर्वदा चिन्तनीयम्। यदि कोऽपि मार्गभ्रष्टो भवति (यथा अस्यां कथायां नहुषः) तर्हि सत्सङ्गेन (अत्र युधिष्ठिरः) पुनः सन्मार्गे आगच्छति। अपि च यस्मिन् समाजे प्रधानतया जातिकुलादीनाम् अपेक्षया चरित्रेण, व्यवहारेण गुणैरेव मानवस्य अभिज्ञानं भवेति, सः समाजो राष्ट्रो वा उत्कृष्टतां परिपूर्णतां च प्राप्नोति।

## संदर्भ


1. महर्षिवेदव्यासप्रणीतं महाभारतम् (मूलम्) (गीताप्रेस् गोरखपुर)
2. श्रीमदानन्दतीर्थभगवत्पादविरचितः महाभारततात्पर्यनिर्णयः https://archive.org/details/MahabharathaTatparyaNirnayaVol2/page/313/mode/2up
3. Shivkumar GV. Mahabharata Metaphors: King Nahusha – The Immense Fall and The Great Reformationhttps://www.indictoday.com/long-reads/mahabharata-metaphors-king-nahusha-the-immense-fall-and-the-great-reformation/
4. Sahgall S. Evolving Dharma Consciousness of Dharmaputra Yudhishthira within the Mahabharata. Advances in Social Sciences Research Journal. 2020;7(12):14-26. https://doi.org/10.14738/assrj.712.9444
5. Adam Bowles Mahabharata and Dharma (Hinduism in India) Sage Publications, New Delhi, 2017. ISBN: 978-93-515-0572-3 (HB)